International Journal of Contemporary Research in Multidisciplinary; 2023; 2(6): 41-43

IJCRM

International Journal of Contemporary Research In Multidisciplinary

*Review Article*

# कवि चूडामणि चक्रवर्तिविरचित वेदस्तुति टीका

**Author (s):** डॉ नन्दिता मिश्रा[1*]

[1]*सहायक आचार्य, संस्कृत विभाग, जवाहरलाल नेहरू स्मारक पी.जी. कॉलेज, महाराजगंज, उत्तरप्रदेश, भारत*

**Corresponding Author:** * डॉ नन्दिता मिश्रा

**प्रस्तावना:**

भागवतपुराणस्य दशमस्कन्धस्य सप्ताशीतितमे 'वेदस्तुति' सांका मात्रकस्मिन अध्याये उपरि अस्ति। कस्यचित् कवेः प्रसिद्धिः किमप्येकमध्याययं ग्रन्थाकारप्रदानमात्रणैव भवति, अतः अस्य ग्रन्थस्य वैशिष्ट्यां 'वेदस्तुति' इति ग्रन्थस्य नाममात्रेण प्रसिद्धमेव। भागवतपुराणस्य यावन्तोऽपि टीकाकाराः व्याख्याकाराश्च जाताः ते प्रायः सम्पूर्णभागवतोपरि अथवा पूर्वार्द्धोपरि, उत्तरार्द्धोपरि अथवा दशमस्कन्दधमात्रोपरि स्वव्याख्यां टीकां कृतवन्तः। दशमस्कन्धोपरि सर्वाधिकी टीका विरचिता जाता। किन्तु वेदस्तुतिमात्रोपरि न केनापि टीका कृता। अत अस्याः वैशिष्ट्यां स्वयमेव परिलक्षितं भवति।

सम्पूर्णाध्याये पञ्चाशत्संख्याकाः श्लोकाः सन्ति। तेषु चतुर्दशादारभ्य एकचत्वारिंशत्पद्यपर्यन्ता अष्टाविंशतिः श्लोका एव वेदस्तुतिनामतः प्रख्यातनर्कुटकच्छन्दसा विनिर्मिता उपलभ्यन्ते। पुराणसाहित्ये भागवतपुराणं टीकासम्पत्तिदृष्टया अपि अग्रगण्यमास्ति। इदं यावत् सारगर्भितं प्रमोयबहुलं विद्यते यत् व्याख्यानप्रसादेनैव तस्य गम्भीरार्थे जनाः प्रवेशः प्राप्नोतुं शक्नुवन्ति। अतएवोक्तम्–**'विद्यावतां भागवते परीक्षा'** समस्तवेदानां सारभूततत्त्वं ब्रह्म आत्मैक्यरूप्यं च मुख्य प्रतिपाद्यविषयो वर्तते। कैवल्यमुक्तिरेवास्य एकमात्रं प्रयोजनम्। गम्भीरार्थानां गूढार्थानां च सुबोधाय सरलीकरणाय प्राचीनकालादेव अस्योपरि अनेकटीकाग्रन्थानां रचना जाता। तेषु प्रमुखटीकानां टीकाकाराणाश्च संक्षेपेण निरुपणं मयात्र क्रियते।

**Manuscript Information**

- **ISSN No:** 2583-7397
- **Received:** 13-10-2023
- **Accepted:** 29-11-2023
- **Published:** 03-12-2023
- **IJCRM:**2(6);2023:41-43
- **©2023, All rights reserved**
- **Plagiarism Checked:** Yes
- **Peer Review Process:** Yes

**How to Cite this Manuscript**

डॉ नन्दिता मिश्रा. **कवि चूडामणि चक्रवर्तिविरचित वेदस्तुति टीका.** International Journal of Contemporary Research in Multidisciplinary. 2023; 2(6):41-43.

**कूटशब्दः** भागवते परीक्षा, विद्यावतां, कवि चूडामणि, वेदस्तुति

## 1. श्रीधरस्वामीकृता–भवार्थदीपिका

श्रीमद्भागवतपुराणस्य उपलब्धटीकासु मध्ये 'भावार्थदीपिका' नाम्नी टीका सर्वप्राचीना सर्वश्रेष्ठा चास्ति। टीकायाः मंगलेश्लोकेन ज्ञायते यत् श्रीधराचार्यः नृसिंहभगवतः उपासक आसीत्। एतस्मिन् टीकाविषये एका उक्तिः प्रसिद्धा वर्तते–

**व्यासो वेत्ति शुको वेत्ति राजा वेत्ति न वेत्ति वा।**
**श्रीधरः सकलं वेत्ति श्रीनृसिंह–प्रसादतः।।[1]**

श्रीधराचार्यकृतटीकाविषये चैतन्यमहाप्रभु कथयति यत्– यथा स्वामिप्रतिकूला भार्या न कदापि पतिव्रता भवितुं शक्यते तथैव स्वामिप्रतिकूलव्यक्ति भागवतस्य रहस्यं न ज्ञातुं शक्यते। श्रीधरः शंकराचार्यस्य अद्वेतमतानुयायी वर्तते किन्तु मतविरोधेऽपि चैतन्यसम्प्रदायं प्रति आदरं एतयोः महत्त्वप्रामाण्ययो परिचायकमस्ति। तस्मात् इयं टीका सर्वापेक्षा अत्यधिका लोकप्रिया अस्ति। श्रीधरस्वामिनः गुरोर्नाम परमानन्द आसीत्, येषाम् आज्ञया काश्यां स्थित्यैव भागवतोपरि इयं सर्वार्थप्रकाशिनी टीका लिखिता। एतस्मिन्टीकाविषये नाभादासमहोदयेनोक्तं यथा–

**तीन काण्ड एकत्व सानि कोऊ अज्ञ बखानत।**
**कर्मठ ज्ञानी ऐंचि अर्थ को अनरथ बानत।।**
**'परमहंसंहिता' विदित टीका विसतार्‌यौ।**
**षट् शास्तानि अविरुद्ध वेद–सम्महिं विचारयौ।।**
**'परमानन्द' प्रसाद तें माधौ सुकर सुधार दियौ।**
**श्रीधर श्रीभागौत मैं परम धरम निरनै कियौ।।[2]**

श्रीधराचार्य अस्मिन्ग्रन्थे वेदान्तशाöस्य प्रसिद्धाचार्यस्य चित्सुखाचार्यस्य टीकायाः निर्देशं कृतवान्। राधारमणगोस्वामिमहाभागाः श्रीधरीटीकायाः उपरि 'दीपनी' नाम्नी व्याख्या विरचिता। श्रीधरस्वामिनः कालस्य यथार्थनिरूपणं भागवतटीकाकाराणां पौर्वापर्यज्ञानाय नितान्तमावश्यकं वर्तते।

- श्रीधराचार्येण चित्सुखाचार्यविरचिता भागवतव्याख्याः अनुसरणं स्वटीकायां कृतम्। चित्सुखाचार्यस्य समयः 1220 : 1288 खीष्टाब्दमध्ये स्वीकृते ज्ञातः, तस्मात् 1200 खीष्टब्दात् पूर्वमस्य कालः स्वीकर्तुं शक्यते।
- श्रीधराचार्येण बोपदेवस्योल्लेख, स्वटीकायां कृतः तथा च एतद् भगवतप्रणेतृत्वस्य खण्डनमपि कृतम्। फलतः ये 1300 खीष्टाब्दात् पूर्ववर्ती न भवितुं शक्यते।
- आचार्यश्रीधरस्य कतिपय पद्यानां नामनिर्देशपुरस्सरं श्रीरूपगोस्वामी स्वसूक्तिसंग्रहे 'पद्यावल्यां' उद्धृतवान्। अतः श्रीधरः षोडशशताब्द्याः पूर्ववर्ती वर्तते। श्रीधरः विष्णुपुराणोपरि या 'स्वप्रकाश' नाम्नी व्याख्या लिखितवान्, तदुपलब्धहस्तलेखेषु प्राचीनतमः हस्तलेखस्य कालः 1500 खीष्टाब्दोऽस्ति, अतः 1500 खीष्टाब्दात् पूर्वमेव श्रीधरस्य समयो वर्तते।
- विष्णुपुरीमहोदयेन स्व 'भक्तिरत्नावल्याः' स्वविरचिता 'कान्तिमाला' नाम्नी व्याख्यां श्रीधरस्वामिनः भागवत्तापर्थं पूर्ण स्वीकृतम्। अस्य ग्रन्थस्योल्लेखः ते सवयमेव कृतः।[3] अस्य ग्रन्थस्य प्रणयनकालः 1633 खीष्टाब्दोऽस्ति।[4] फलतः श्रीधराचार्यम् समयः 1600 खीष्टाब्दात् पूर्वमेव भवेत् अर्थात् 1555 विक्रमसंवतो वर्तते।

अनेक प्रकारेण श्रीधरस्वामिनः कालः विष्णुपुरीबोपदेवयोर्मध्ये कुत्रचित् भवितुं शक्यते। पूर्वोक्तनिःसन्दिग्धप्रमाणानां साक्ष्यबलात अस्याविभविकालः 1300–1350 खीष्टाब्दमध्ये स्वीकरणं समीचीनं प्रतीयते।

### 2. सुदर्शनसूरिकृता–शुकपक्षीया

विशिष्टाद्वैतसम्प्रदायप्रवर्तकस्य श्रीरामानुजस्य श्रीभाष्योपरि 'श्रुतप्रकाशिका' नाम्नी टीकायाः लेखकः सुदर्शनसूरिमहाभाग विशिष्टौतमस्य प्रमुखाचार्यो वर्तते। अस्य कालः चतुर्दशशताब्द्याः आसीत्। किंवन्ति विद्यते यत् दिल्लीराज्यस्य सम्राटः अलाऊद्दीनस्य सेनापतिः 1367 खीष्टाब्दे यदा श्रीरंगमुपरि आक्रमणं कृतवान् तदा तस्मिन्युद्धे ये हता आसन्। अस्याः टीका स्वल्पपरिमाणसत्वेऽपि भावप्रकाशने गम्भीराऽस्ति।

### 3. वीरराघवकृता–भागवतचन्द्रिका

वीरराघवोऽपि विशिष्टाद्वैतमतानुयायी वर्तते। अस्य समयः चतुर्दशशताब्द्याः मन्यते। वीरराघवचार्यस्य इयं टीका सुदर्शनसूरिकृता टीकापेक्षया अधिका विस्तृताऽस्ति। रामानुजमतानुसारेण भागवतरहस्यानां ज्ञानार्थम् इयं टीका सर्वोत्तमा विद्यते। वत्सगोत्रीयः श्रीशैलगुरु अस्य पितुः आसीत्, अस्योल्लेखः स्वयं वीरराघवाचार्येण स्वग्रन्थे कृतम्।

### 4. विजयध्वजकृता–पदरत्नावली

द्वैतमतस्य प्रवर्तकः प्रतिष्ठापथकश्च श्रीमध्वाचार्यः भागवतरहस्यानां प्रकाशनार्थं 'भागवततात्पर्यनिर्णयः' नामको ग्रन्थः विरचितवान्, किन्तु वस्तुत इयं व्याख्या नास्ति। अस्य मतानुयायी प्रसिद्धटीकाकारः विजयध्वजो वर्तते, ये स्वीये 'पदरत्नावल्यां' भागवतस्य द्वैतपरकव्याख्यां लिखितवन्तः। टीकाया आरम्भे एते मध्वाचार्यविजयाचार्यजोः ग्रन्थानामाधारेण स्वीयं टीकायाः निर्माणस्य वार्ता लिखितवन्तः।[5] पदरत्नावलीटीका सुबोधा प्रामाणिकी च वर्तते।

### 5. वल्लभाचार्यकृता–सुबोधिनी

आचार्यवल्लभेन शुद्धाद्वैतमतानुसारेण स्वप्रसिद्धा 'सुबोधिनी' नाम्ना टीका विरचिता। इयं टीका सम्पूर्णभागवतपुराणोपरि नोपलब्धो भवति। प्रारम्भस्य कतिपयस्कन्धानामतिरिक्तं सम्पूर्णदशमस्कन्धोपरि वर्तते। सुबोधिनी टीकायाः भाषा गाम्भीर्ययुक्ता तथा च विवेचनात्मिका विद्यते। वल्लभाचार्येण भागवतस्य स्कन्धानां नूतनदृष्ट्या विभागं कृत्वा नवीनोऽर्थः निःसारितः। ते वदन्ति यत्–भगवतः विष्णोः आदेशं प्रापयित्वा अस्याः टीकायाः रचनां कृतवानहम्। अस्मिन्सम्प्रदाये गिरिधरमहाराजेनापि भागवतोपरि टीका विरचिता, यस्मिन् न स्कन्धमात्रस्यैव प्रत्युत् अध्याययानां विषयस्यापि सूक्ष्मं विभाजनं टीकाकारेण कृतम्। यत्तु अद्भुतं महत्त्वपूर्णं वर्तते।

### 6. शुकदेवाचार्यप्रणीतः–सिद्धान्तप्रदीपः

शुकदेवाचार्यः निम्बार्कमतानुयायी आसीत्। आचार्यनिम्बार्क अस्य सम्प्रदायस्य प्रवर्तक आसीत्। भागवतपुराणोपरि निम्बार्काचार्यस्य न कापि व्याख्या प्राप्यते। शुकदेवाचार्येण निम्बार्कसम्प्रदायमतानुसारं सम्पूर्णभागवतोपरि नूतन तथा सरसपद्धत्या टीका लिखिता।

### 7. सनातनगोस्वामी प्रणीता–

सनातनगोसमी चैतन्यसम्प्रदायानुयायी वर्तते। श्रीचैतन्यमहाप्रभुः आचार्यश्रीधरकृतां टीकामेव स्वमतेऽपि प्रामाणिकं मन्यते किन्तु तेषामनुयायिनः गोस्वामिनः भागवतोपरि नानाटीकानां रचनां कृतवन्तः येषु सनातनगोस्वामी कृता इयं टीका प्राचीनतरा सर्वाधिकप्रामाणिकी च मन्यते बुधाः। इयं टीका दशमस्कन्धमत्रोपरि एव वर्तते।

### 8. जीवस्वामीविरचितः–क्रमसन्दर्भः

जीवगोस्वामिकृता इयं टीका सम्पूर्णभागवतोपरि विद्यते। व्याख्यानदृष्ट्या इयं बहुप्रामाणिकी अस्ति। जीवगोस्वामी भागवतशास्त्रस्य मूर्धन्यविद्वान् आसीत् तथा चास्य पुराणस्य गूढार्थप्रकाशनार्थं ते षट्सन्दर्भनामकः पृथक्रूपेण रचना कृता। भागवतस्याऽयं क्रमसन्दर्भः सप्तमः सन्दर्भो वर्तते। स्वपितृव्यरूपेण

सनातनाज्ञया च निर्मितत्वात् 'रूपसनातनानुशासनभारतीगर्भः' इति संज्ञया अभिहितमस्य ग्रन्थस्य। यथा–

**'श्रीरुपसनातनानुशासनभारतीगर्भे सप्तसन्दर्भात्मकश्रीभागवतसन्दर्भे प्रथमस्कन्धस्य क्रमसन्दर्भः समाप्तः।''[6]**

विश्वनाथचक्रवर्ती अपि चैतन्यसम्प्रदायस्य प्रमुखः मान्याचार्य आसीत्। विश्वनाथकृतायामस्यां टीकायां श्रीधरस्वामी–चैतन्यप्रभुः तथा च तेषां गुरोः व्याख्यानानां सारसंकलनकृतत्वात् 'सारार्थदर्शिनी' इति नाम्ना प्रसिद्धा जाता।[7] इयं टीका लध्वाक्षरीरूपेण वर्तते। किन्तु गूढार्थबोधाय परमश्रेयसकरी मन्यते।

## 10. श्री हरिविरचितम्–हरिभक्तिरसायनम्

श्रीहरिः एकः महनीयः कविः भक्तश्चासीत्। ये गोदावरी तटवासीनः सदाचारिणः कश्यपगोत्रीयः ब्राह्मण आसीत्। अस्याः टीकाया नाम 'हरिभक्तिरसायनम्' इति वर्तते, तथा च टीकायाः रचनाकालः 1759 शकसंवत् वर्तते। इयं दशमस्कन्धस्य पूर्वार्धमात्रोपरि एव वर्तते। इयं टीका पद्यात्मिका अस्ति तथा च एकोनपञ्चाशत् 49 अध्याया सन्ति, एवञ्च विविधछन्देषु प्रायः पश्चसहस्त्रश्लोकाः सन्ति। इयं न साक्षात्टीकाग्रन्थः, अपित मौलिकः ग्रन्थो वर्तते येषु भागवती लीलायाः पदावल्यां ललितविन्यासः विद्यते। यथा–

**अगाधे जलेऽस्याः कथं वाम्बुकेलि–<br>र्ममाग्रे विधेयेति शंका प्रमार्ष्टुम्।<br>क्वचिज्जानुदघ्ना क्वचिन्नाभिदघ्ना।<br>क्वचित् कण्ठदघ्ना च सा किं तदासीत्।।**

एतेषां टीकाकाराणां व्याख्याकाराणमतिरिक्तं भागवतस्य अन्याः मान्याः व्याख्यातारोऽपि स्वव्याख्यानेभ्यः इयं पुराणं सुशोभितं कृतवन्तः। जीवगोस्वामी महाभागः तत्त्वसन्दर्भनामके ग्रन्थे हनुमद्भाष्य–वासनाभाष्य–सम्बोधोक्ति–विद्वत्कामधेनु–तत्त्वदीपिका–भावार्थदीपिका–परमहंसप्रिया–शुकहृदयाद्यानां व्याख्याग्रन्थायां स्पष्टरूपेण निर्देशं कृतवान्। एतेषु भावार्थदीपिकां विहाय सर्वमप्रसिद्धं वर्तते। एतदतिरिक्तम् श्रीगंगासहाय विद्यावाचस्पति कृता अन्वितार्थप्रकाशिका, वंशीधरी–चूणिकादयः टीका अपि उपलब्धा अस्तीति संक्षेपेण भागवतटीकापरम्परायाः निरूपणमहं स्वशोधप्रबन्धे कृतवान्।

## सन्दर्भसूची

1. प्रसिद्धोक्ति :
2. छप्पय–440ए नाभादासजीकत
3. अत्र श्रीधरसत्तमोक्तिलिखने न्यूनाधिकं यत्त्वभूत्। तत् क्षन्तुं सुधियोऽर्हत स्वरचनालुब्धस्य मे चापलम्।। भक्ति रत्नावली–13.14
4. महायज्ञ–शर–प्राण–शशांकगणिते शके। फाल्गुने शुक्लपक्षस्य द्वितीयायां सुमंगले।। भक्तिरत्नावली–13–16
5. आनन्दतीर्थ–विजयतीर्थौ प्रणम्य मस्करिवर–वन्द्यौ। तपोः कृतिं स्फुटमुपजीव्य प्रवच्मि भागवतं पुराणम्। टीकायाः आरम्भः।

**Creative Commons (CC) License**

This article is an open access article distributed under the terms and conditions of the Creative Commons Attribution (CC BY 4.0) license. This license permits unrestricted use, distribution, and reproduction in any medium, provided the original author and source are credited.